International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 100-101
© 2026 IJMH
www.themultijournal.com
Received: 12-05-2026
Accepted: 06-06-2026
Publish : 08-06-2026

**Dr.A. SHEKAR REDDY**
Assistant professor,
Dept, of Education,
National Sanskrit University,
Tirupati.

**Correspondence:**
**Dr.A. SHEKAR REDDY**
Assistant professor,
Dept, of Education,
National Sanskrit University,
Tirupati.

# प्राचीनाधिगमप्रणाली
# Ancient Learning System

**Dr.A. SHEKAR REDDY**

**को नाम अधिगमः ?** (What is Learning?)

Learning-1) Learning may be defined as acquisition of any relatively permanent change in behavior that occurs at a result of practice or experience.

J.P. Chaplin, Dictionary of Psychology, 1968)

अधिगमः – अभ्यासस्य अनुभवस्य वा फलरूपेण व्यवहारे जायमानः प्रायः स्थायिविपरिणाम एव अधिगमः। अयञ्च विपरिणामः केवलशरीरविकासेन सहजपरिपक्वतया वा न जातः स्यात्। अर्थात्- अधिगमो नाम जीवस्य स्वकीयव्यापारेण तद्व्यवहारे जायमानो विकारः विपरिणामो वा।

2) Process of acquiring responses as a result of special practice

J.P. Chaplin, Dictionary of Psychology, 1968)

विशेषाभ्यासफलरूपेण प्रतिक्रियाप्राप्तेः प्रक्रियैव अधिगमः ।

का नाम प्रणाली ?

**(What is system?)**

System A set of elements that organized to work together to perform a function.

(Encyclopedia of Education)

प्रणाली- कार्यविशेषसम्पादनार्थं समन्वितरूपेण क्रियाकरणाय सुव्यवस्थितानां तत्त्वानां समुदायः प्रणाली ।

**का नाम अधिगमप्रणाली ?**

**(What is learning system?)**

Learning system - A set of elements that are organized systematically to make a permanent change in the learner's behavior.

अधिगमप्रणाली - अध्येतुः व्यवहारे स्थिरं परिवर्तनं जनयितुं सुव्यस्थितरूपेण संयोजितानां तत्त्वानां समुदायः।

यानि तत्त्वानि अधिगमं प्रभावयन्ति तानि सर्वाण्यपि अधिगमप्रणाल्यामन्तर्भावितानि भवन्ति ।

शिक्षा **शिष्याचार्यविषयरूपा त्रिध्रुवी प्रक्रिया** इत्याधुनिकानाम्मतम् ।

**"आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्।"** आचार्यः, शिष्यः, विषयः, विधिश्चेति चतुध्रुवसमन्वितप्रक्रियात्वेन शिक्षामामनन्ति प्राचीनाचार्याः।

इमानि चत्वारि प्रधानतत्त्वानि परस्परं सुसमन्वितानि व्यवस्थितानि सन्ति अधिगमप्रक्रियां प्रवर्तयन्ति। एषु प्राधान्येन आचार्य-शिष्यसम्बन्धः, अधिगमपद्धतयः, अध्यापनपद्धतयः, स्वाध्यायः इतीमे शिष्याधिगमप्रणालीं नितरां प्रभावयन्ति।

मनोवैज्ञानिकैः अधिगमक्षेत्रे अनेकान् प्रयोगान् विधाय काश्चन मनोवैज्ञानिकपद्धतयः प्रत्यपादिषत। तासु क्रियाद्वारा अधिगमः (Learning by doing) अन्यतमः ।

The seat of memory is not in the mind, but in the muscular system. We learn by doing.

बालाः यत्कार्यं कुर्वन्ति तत् शीघ्रं शिक्षन्ते । यतः तत्सम्पादनसमये ते तदुद्देश्यं निर्मान्ति, तदीयं योजनां रचयन्ति, तां क्रियान्वितां कुर्वन्ति, स्वीयप्रयत्नास्सफला अभूवन्नवेति दृष्ट्वा यदि नाभूवन् तर्हि

स्वीयदोषानभिज्ञाय तद्दूरीकरणे प्रयतन्ते ।

**प्रयोगपूर्वकः अधिगमः - (Learning by experimenting)**

बालः यान् विषयान् प्रयोगपूर्वकं शिक्षते ते तदीयाङ्गत्वं यान्ति सारल्येन । पुस्तकाधिगमापेक्षया प्रयोगपूर्वकाधिगमः प्रभावी सरलः, रोचकश्च भवति ।

**३.सामूहिकविधिभिः अधिगमः (Learning by Group Methods)**

व्यक्तिगताधिगमापेक्षया सामूहिकविधीनां द्वारा सम्पन्नः अधिगमः अधिकोपयोगी प्रभावशाली च भवतीति प्रयोगैः न्यरूपि।

चर्चाविधिः Discussion Method

Dr. Mace - Quoted by pryns Hopkins in the book Acts to Successful Teaching, P.154.

**प्रयोगविधिः (Experimental method)**

The Method must utilize the laws of learning

सश्रद्धता (Preparation) अभ्यासः (Practice) प्रभावः (effect) इतीमे शिक्षणनियमाः शिक्षणविधिना आपादितास्स्युः ।

The learning method must utilize the theory of self-activity (Teaching method should be interactively in order to develop higher mental abilities)

अध्यापनविधिः स्वक्रियार्थं यथोचितमवसरं कल्पयेत् । छात्रक्रियाः अनुभवनं, प्रतिक्रिया, करणम्, प्राप्तिः, इत्यादिरूपा भवन्ति। छात्रः स्वीयप्रतिक्रियया शिक्षत इति प्रतिपादयत्ययं सिद्धान्तः। शिक्षणविधिः यावता प्रमाणेन पारस्परिकान्तश्चर्यार्थमवसरं कल्पयति छात्रेभ्यः तावत्प्रमाणेन छात्रबौद्धिकमानसिकशक्तयः समेधन्ते।

एतत्सिद्धान्तविद्भिः प्राचीनशिक्षकैः खण्डावन्यविधिर्नाम पद्यकाव्यशिक्षणविधिः कोऽप्याविष्कृतः यस्मिन् पूर्वोक्तसिद्धान्तः सामग्र्येणानुप्रयुज्यते।

**ओङ्कारदासेन अन्वयप्रबोधे खण्डान्वयः इत्थं प्रत्यपादि**
**कर्तृकर्मक्रियास्तावच्छलोके योज्यास्ततः परम्**
**किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत् ।**
**ल्यबन्तं च तुमन्तञ्च क्त्वान्तं कर्मविभूषितम्**
**खण्डान्वये पुनः प्रश्नं पूर्वमन्ते प्रयोजयेत् ।।**

**गुरुशिष्यसम्बन्धः-**

शिक्षाप्रणाल्यां गुरुशिष्यौ प्रमुखस्तम्भायेते । तयोः पारस्परिकसम्बन्धः अधिगमप्रणलीं नितरां प्रभावयति । गुरोः प्रामाणिकता, चारित्र्यम्, निबद्धता, समयपालनमित्यादिश्रेष्ठगुणानां प्रभावः शिष्यव्यवहारं परिवर्तयितुमलं भवन्ति । छान्दोग्योपनिषद् - ६, ५, १-४ छान्दोग्योपनिषद् - ६-१२

पूर्वोक्तसद्गुणगणवानाचार्यः शिष्याणामादरभाजनं भवतीति निश्चप्रचम् । शिष्या यदि स्वाचार्ये गौरवबुद्धिं वहन्ति तर्हि तदध्याप्ये विषयेऽपि आदरभावं वहन्तः सम्यक् शिक्षन्ते । विद्विष्टाचार्येण अध्याप्यविषयाय विद्विषन्ति छात्रा इति प्रतिष्ठितं तथ्यम् । तस्मादुपाध्याय शिष्य सम्बन्धेन प्रीतिमता भाव्यम्।

**अनुकरणप्रणाली (Learning by imitation)**

अनुकरणं सहजप्रवृत्तिरूपं, तस्य च शिक्षणेऽस्त्युपयोगः। शिक्षितपूर्वः कश्चित किमपि कार्यं स्वयं दर्शयति तत्पश्यन् अन्योऽपि तथा कुरुते। मानवेषु विशिष्य बालेषु अनुकरणशक्तिरधिका। अतस्ते निसर्गतया पुरः स्थितमादर्शमनुकुर्वन्तः शिक्षन्ते ।

अनुकरणेन शिक्षणे त्रयमपेक्षितम् ।

१. यस्य कार्यमनुक्रियते तेन अनुकर्तव्यं सम्यक् कार्यम् ।
२. अनुकार्यः शोभनादर्शो भवेत् ।
३.तृतीयं प्रधानं च अनुकार्यानुकरणकर्त्रोः सम्बन्धः नितरामात्मीयतापूर्णस्स्यात् ।

**अधिगमायामानामाधारः गुरुशिष्यसम्बन्धः -**

Relationship of Guru & Shishya is the base of the learning domains

ज्ञानात्मक (cognitive) शारीरिकक्रियात्मक (Conative) भावात्मक (affective) रूपेण त्रयः आयामाः अधिगमस्य । बालाः ज्ञानात्मकं, शारीरिकक्रियात्मकं, भावात्मकं च प्रशिक्षणं प्राप्नुवन्ति आचार्यसन्निधौ । एतत्सर्वं तयोस्सम्बन्धे आत्मीयतापूर्णं सत्येव सिद्ध्यति नान्यथा ।

**आप्तवाक्यम् अधिगमव्यूहः -**

ज्ञानसाधनानि चत्वारि । प्रत्यक्षानुमानोपमानशब्दभेदात् । तत्र आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । आप्तत्वं च प्रयोगहेतुभूतयथार्थज्ञानवत्वंम्। तथा च प्रयोगहेतुभूतयथार्थज्ञानजन्यशब्दत्वमिति पर्यवसन्नार्थः ।

आप्तोपदेशः व्यक्तेः ज्ञाने, व्यवहारे, अभिवृत्तौ च परिवर्तनामनेतुं प्रभवति। सामान्यजीवनेऽपि विभिन्नपरिस्थितिषु वयमाप्तवाक्यं प्रमाणत्वेन स्वीकुर्मः । वयं नित्यजीवने शिक्षकेभ्यः पुस्तकेभ्यश्च ज्ञानं प्राप्नुमः । संसारे कोऽपि न्यूटन्सिन्द्धान्तान् पुनः प्रत्यक्षेण अनुमानेन प्रयोगं नाधीते। भौतिकशास्त्राध्यापकेनाध्यापितान् न्यूटन् सिद्धान्तान् छात्राः यथार्थेन स्वीकुर्वन्ति । अतः आप्तवाक्यम् अधिगमविधाने महत्वपूर्णं पात्रं वहति। आप्तवाक्यं व्यक्तेः व्यक्तित्वे बौद्धिक (Cognitive) भावात्मक (Affective) क्रियात्मक (Con-ative) अभिवृत्यात्मक (Attitudinal) प्रेरणात्मक (Motivational) परिवर्तनान्यानयति इति अस्माकं सामान्यानुभवः।

**परिचर्चा –**

अधिगमः सर्वजीवसाधारणो धर्मः । जन्मन आरभ्य मृत्युपर्यन्तं सर्वेऽपि प्राणिनः सर्वदा किमपि किमपि अधिगच्छन्तः भवन्त्येव । अधिगमः आजीवनं प्रचलमाना एका निरन्तरप्रक्रिया भवति । तत्रापि मानवानां अधिगमः विशिष्टः भवति । तत्रापि पुनः नियतशिक्षाव्यवस्थायां छात्राणां अधिगमसंपादनं अध्यापकानां कृते अतिमहत्वपूर्णं लक्ष्यं वर्तते। अतः अधिगममधिकृत्य समग्रं ज्ञानं विना उचितया रीत्या छात्राणां अधिगमसंपादनं शक्यमिति कृत्वा अधिगममधिकृत्य विस्तृतया ज्ञातव्यं वर्तते ।

**सन्दर्भग्रन्थसूची-**

1. सांख्यप्रवचनभाष्यम्
2. सांख्यतत्त्वकौमुदी
3. न्यायसूत्रम्
4. Drew Western, Psychology of Mind, Brain &Culture
5. Dr. Mace – Quoted by pryns Hopkins in the book Aids to Successful Teaching